कीर्त्तिकामो यजेन्नित्यं लिङ्गं कांस्यसमुद्भवम् ।
शत्रुमारणकामस्तु लिङ्गं लौहमयं सदा ।
सदा सीसमयं लिङ्गमायुष्कामोऽर्च्चयेत् नरः ॥”
इति मत्स्यसूक्तमहातन्त्रम् ॥
“स्थिरलक्ष्मीप्रदं हैमं राजतं चैव राज्यदम् ।
प्रजापुष्टिकरं राङ्गं ताम्रमायुःप्रवर्द्धनम् ॥
विद्वेषकारणं कांस्यं रीतिजं शत्रुनाशनम् ।
रोगघ्नं सैसकं लिङ्गमायसं शत्रुनाशनम् ॥
अष्टलौहमयं लिङ्गं कुष्ठरोगक्षयावहम् ।
त्रिलौहसम्भवं लिङ्गं विज्ञानं प्रति सिद्धिदम् ॥”
इति लक्षणसमुच्चयः ॥
“श्रीप्रदं वज्रजं लिङ्गं शिलाजं सर्व्वसिद्धिदम् ।
धातुजं धनदं साक्षाद्दारुजं भोगसिद्धिदम् ॥”
इति लिङ्गपुराणम् ॥
“गन्धपुष्पमयं लिङ्गं तथान्नादिविनिर्म्मितम् ।
कस्तूरीसम्भवं लिङ्गं धनाकाङ्क्षी प्रपूजयेत् ॥
लिङ्गं गोरोचनोत्थञ्च रूपकामस्तु पूजयेत् ।
कान्तिकामस्तु सततं लिङ्गं कुङ्कुमसम्भवम् ॥
श्वेतागुरुसमुद्भूतं महाबुद्धिविवर्द्धनम् ।
धारणाशक्तिदं लिङ्गं कृष्णागुरुसमुद्भवम् ॥
यक्षकर्द्दमसम्भूतम् ।” इति कालोत्तरः ॥
“पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत् ।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम् ॥
स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम् ।
सर्व्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् ॥
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः ।
गङ्गायाश्च शतगुणं लाक्षायां रोगवान् भवेत् ।
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये ।
लौहलिङ्गे रिपोर्नाशः कामदं भस्मलिङ्गकम् ।
वालुकायां काम्यसिद्धिर्गोमये रिपुहिंसनम् ।
सर्व्वलिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम् ॥”
इति मातृकाभेदतन्त्रे १२ पटलः ॥
“ब्रह्मा संपूजयेन्नित्यं लिङ्गं शैलमयं शुभम् ।
तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम् ॥
इन्द्रनीलमयं लिङ्गं विष्णुः समर्च्चयेत् सदा ।
विष्णुत्वं प्राप्तवान् तेन सोऽभूद्भूतैकपालकः ॥
स्फाटिकं निर्म्मलं लिङ्गं वरुणोऽभ्यर्च्चयेत् सदा ।
तेन तद्वरुणत्वं हि प्राप्तं तेजोबलान्वितम् ॥”
इति षट्कर्म्मदीपिकाधृतशिवधर्म्मः ॥
“पूजयेत् पार्थिवे लिङ्गे पाषाणलिङ्गकेऽथवा ।
स्वर्णलिङ्गेऽथवा देवि रौप्ये ताम्रे च कांस्यके ॥
पारदे वाथ गङ्गायां स्फाटिके मरकतेऽपि वा ।
कार्य्यभेदे लौहलिङ्गे भस्मनिर्म्मितलिङ्गके ॥
वालुकानिर्म्मिते लिङ्गे गोमये वाथ पूजयेत् ।
संस्कारेण विना देवि पाषाणादौ न पूजयेत् ॥”
इति मातृकाभेदतन्त्रे ७ पटलः ॥
इति शिवलिङ्गनिर्म्माणद्रव्याणि ॥ * ॥ अथ शिवलिङ्गसंस्कारः ।
“संस्कारञ्च प्रवक्ष्यामि विशेष इह यद्भवेत् ॥
रौप्यञ्च स्वर्णलिङ्गञ्च स्वर्णपात्रे निधाय च ।
तस्मादुत्तोल्य तल्लिङ्गं दुग्धमध्ये दिनत्रयम् ।
पञ्चकेन स्नापयित्वा कालरुद्रं प्रपूजयेत् ॥
षोड़शेनोपचारेण वेद्यान्तु पार्व्वतीं यजेत् ।
तस्मादुत्तोल्य तल्लिङ्गं गङ्गातोये दिनत्रयम् ।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः ॥”
पूर्व्वोक्तवचनैः फलविशेषकामनया नानाविधलिङ्गपूजोक्ता सा च पूजा ।
“लिङ्गं सुलक्षणं कुर्य्यात्त्यजेल्लिङ्गमलक्षणम् ।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम् ॥
मानहीने विनाशः स्यादधिके च शिशुक्षयः ।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेद्ध्रुवम् ॥
पीठहीने तु दारिद्र्यं शिरोहीने कुलक्षयः ।
ब्रह्मसूत्रविहीने च राज्ञां राष्ट्रञ्च नश्यति ।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम् ॥”
इत्यादिना सुलक्षणलिङ्गस्यैव फलदातृत्वमुक्तम् ।
इति मातृकाभेदतन्त्रे ७ पटलः ॥
देव्युवाच ।
“इन्द्रिये रहितो देवः शून्यरूपः सदाशिवः ।
आकारो नास्ति देवस्य किं तस्य पूजने फलम् ॥
शिव उवाच ।
शेते पूजा महेशानि कदाचिन्नास्ति पार्व्वती ।
रुद्रस्य परमेशानि रौद्री शक्तिरितीरिता ॥
रौद्री तु परमेशानि आद्या कुण्डलिनी भवेत् ।
वर्त्तते परमेशानि ब्रह्मविष्णुशिवात्मिका ॥
सार्द्धत्रिवलयाकारैः शिवं वेष्ट्य सदा स्थिता ।
शक्तिं विना महेशानि प्रेतत्वं तस्य निश्चितम् ॥
शक्तिसंयोगमात्रेण कर्म्मकर्त्ता सदाशिवः ।
अतएव महेशानि पूजयेच्छिवलिङ्गकम् ॥”
इति सशक्तिकशिवलिङ्गपूजनफलम् ॥
इति लिङ्गार्च्चनतन्त्रे २ पटलः ॥ * ॥
देव्युवाच ।
“लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो ।
पार्थिवे च शिलादौ च विशेषो यत्र यो भवेत् ॥
श्रीशिव उवाच ।
मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम् ।
एतदन्यन्न कुर्व्वीत कदाचिदपि पार्व्वति ॥”
इति मातृकाभेदतन्त्रे ७ पटलः ॥
अपि च ।
“मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम् ।
त्रिसूत्रस्य प्रमाणेन घटनं कारयेद्बुधः ॥
स्वाङ्गुष्ठपर्व्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत् ।
मृदादिलिङ्गघटने प्रमाणं परिकीर्त्तितम् ।
फलमुक्तमवाप्नोति अन्यथा चैतदन्यथा ॥”
इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम् ॥
“लिङ्गे वेद्यां तथा पीठे समसूत्रनिपातनात् ।
समत्वेव विजानीयाच्छिलस्त्रीकरणन्त्विदम् ॥”
इति कालोत्तरः ॥
मृत्तिकाभेदेन ब्राह्मणादीनां पूजाफलस्य प्रशस्तत्वं यथा,—
“चतुर्धा पार्थिवं लिङ्गं मृत्तिकाभेदेन पार्व्वति ।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ॥
शुक्लन्तु ब्राह्मणे शस्तं क्षत्त्रिये रक्तमिष्यते ।
पीतन्तु वैश्यजातौ स्यात् कृष्णं शूद्रे प्रकीर्त्तितम् ॥”
तथा ।
“शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स एव परमेशानि त्रिवर्गफलभाग्भवेत् ॥
क्षत्त्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम् ।
पूजयेत् सततं यस्तु त्रिवर्गफलमाप्नुयात् ॥
हरितं पार्थिवं देवि ! निर्म्माय यस्तु पूजयेत् ।
स च वैश्यो महेशानि ! त्रिवर्गफलभाग्भवेत् ॥
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स शूद्रः परमेशानि ! त्रिवर्गफलभाग्भवेत् ॥”
इति लिङ्गार्च्चनतन्त्रे ३ पटलः ॥ * ॥
“शिलादौ च महेशानि ! स्थूलञ्च फलदायकम् ।
अङ्गुष्ठमानं देवेशि ! यद्वा हैमाद्रिमानकम् ॥
क्रमेण देवदेवेशि ! फलं बहुविधं लभेत् ।
स्थूलात् स्थूलतरं लिङ्गं रुद्राक्षं परमेश्वरि ! ॥
पूजनाद्धारणाद्देवि ! फलं बहुविधं स्मृतम् ॥”
स्थूलात् स्थूलमिति पार्थिवलिङ्गेतरपरम् । मृत्तिकातोलकमिति विशेषवचनात् । शिलास्फाटिकमरकतादीनां पञ्चसूत्रीकरणमुक्तं यथा,—
“शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः ।
योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत् ॥”
इति लिङ्गपुराणम् ।
“लिङ्गस्य यादृग्विस्तारः परिणाहोऽपि तादृशः ।
लिङ्गस्य द्विगुणा देवी योनिस्तदर्द्धसम्मिता ॥
कुर्व्वीताङ्गुष्ठतो ह्रस्वं न कदाचिदपि क्वचित् ।
रत्नादिशिवनिर्म्माणे मानमिच्छावशाद्भवे ॥”
इति तन्त्रान्तरम् ॥
लिङ्गव्युत्पत्तिर्यथा,—
“आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते ॥”
इति स्कन्दपुराणम् ॥
लिङ्गमहिमा यथा,—
शिव उवाच ।
“न तुष्याम्यर्च्चितोऽर्च्चायां पुष्पधूपनिवेदनैः ।
लिङ्गेऽर्च्चिते यथात्यर्थं परं तुष्यामि पार्व्वति ! ॥
एष देवि ! पुरा कल्पे जीनोऽहं सर्व्वदैवतैः ।
लिङ्गत्वाल्लिङ्गमित्युक्तं सदेवासुरकिन्नरैः ॥
प्रवक्ष्यामि दिवं देवि ! यो मल्लिङ्गार्च्चने रतः ।
त्यक्त्वा सर्व्वाणि पापानि निर्गतो दग्धकल्मषः ॥
मन्मना मन्नमस्कारी मामेव प्रतिपद्यते ॥”
इति वीरमित्रोदयधृतस्कन्दपुराणम् ॥
अथविशेषेण पूजादिफलं यथा,—
“वस्त्रपूतजलैर्लिङ्गं स्नपित्वा मम मानवाः ।
लक्षाणाञ्चाश्वमेधानां फलमाप्नोति सत्तमः ॥
सुगन्धिचन्दनरसैर्लिङ्गमालिप्य भक्तितः ।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यक्षकर्द्दमैः ॥”
इति तत्रैव ॥ * ॥
लिङ्गपूजाया अकरणे दोषः तत्पूजाफलञ्च यथा,
“विना लिङ्गार्च्चनं यस्य कालो गच्छति नित्यशः ।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः ।
एकतः सर्व्वदानानि व्रतानि विविधानि च ।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः ॥